श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ सप्तपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तपञ्चाशः सर्गः ॥

## वसिष्ठकर्तृकं नूतनदेहधारणं निमेः प्राणिनां नयनेषु निवासश्च

तां श्रुत्वा दिव्यसङ्काशां कथामद्भुतदर्शनाम्।
लक्ष्मणः परमप्रीतो राघवं वाक्यमब्रवीत्॥ **7.57.1** ॥

निक्षिप्तदेही काकुत्स्थ कथं तौ द्विजपार्थिवौ।
पुनर्देहेन संयोगं जग्मतुर्देवसम्मतौ॥ **7.57.2** ॥

तस्य तद् भाषितं श्रुत्वा रामः सत्यपराक्रमः।
तां कथां कथयामास वसिष्ठस्य महात्मनः॥ **7.57.3** ॥

यः स कुम्भो रघुश्रेष्ठ तेजःपूर्णो महात्मनोः।
तस्मिंस्तेजोमयौ विप्रौ सम्भूतावृषिसत्तमौ॥ **7.57.4** ॥

पूर्वं समभवत् तत्र अगस्त्यो भगवानृषिः।
नाहं सुतस्तवेत्युक्त्वा मित्रं तस्मादपाक्रमत्॥ **7.57.5** ॥

तद्धि तेजस्तु मित्रस्य उर्वश्याः पूर्वमाहितम्।
तस्मिन् समभवत् कुम्भे तत्तेजो यत्र वारुणम्॥ **7.57.6** ॥

कस्यचित् त्वथ कालस्य मित्रावरुणसम्भवः।
वसिष्ठस्तेजसा युक्तो जज्ञे इक्ष्वाकुदैवतम्॥ **7.57.7** ॥

तमिक्ष्वाकुर्महातेजा जातमात्रमनिन्दितम्।
वव्रे पुरोधसं सौम्य वंशस्यास्य हिताय नः॥ **7.57.8** ॥

एवं त्वपूर्वदेहस्य वसिष्ठस्य महात्मनः।
कथितो निर्गमः सौम्य निमेः शृणु यथाभवत्॥ **7.57.9** ॥

दृष्ट्वा विदेहं राजानमृषयः सर्व एव ते।
तं च ते याजयामासुर्यज्ञदीक्षां मनीषिणः॥ **7.57.10** ॥

तं च देहं नरेन्द्रस्य रक्षन्ति स्म द्विजोत्तमाः।
गन्धैर्माल्यैश्च वस्त्रैश्च पौरभृत्यसमन्विताः॥ **7.57.11** ॥

ततो यज्ञे समाप्ते तु भृगुस्तत्रेदमब्रवीत्।
आनयिष्यामि ते चेतस्तुष्टोऽस्मि तव पार्थिव॥ **7.57.12** ॥

सुप्रीताश्च सुराः सर्वे निमेश्चेतस्तदाब्रुवन्।
वरं वरय राजर्षे क्व ते चेतो निरूप्यताम्॥ **7.57.13** ॥

एवमुक्तः सुरैः सर्वैर्निमेश्चेतस्तदाब्रवीत्।
नेत्रेषु सर्वभूतानां वसेयं सुरसत्तमाः॥ **7.57.14** ॥

बाढमित्येव विबुधा निमेश्चेतस्तदाब्रुवन्।
नेत्रेषु सर्वभूतानां वायुभूतश्चरिष्यसि॥ **7.57.15** ॥

त्वत्कृते च निमिष्यन्ति चक्षूंषि पृथिवीपते।
वायुभूतेन चरता विश्रामार्थं मुहुर्मुहुः॥ **7.57.16** ॥

एवमुक्त्वा तु विबुधाः सर्वे जग्मुर्यथागतम्।
ऋषयोऽपि महात्मानो निमेर्देहं समाहरन्॥ **7.57.17** ॥

अरणिं तत्र निक्षिप्य मथनं चक्रुरोजसा।
मन्त्रहोमैर्महात्मानः पुत्रहेतोर्निमेस्तदा॥ **7.57.18** ॥

अरण्यां मध्यमानायां प्रादुर्भूतो महातपाः।
मथनान्मिथिरित्याहुर्जननाजनकोऽभवत्॥ **7.57.19** ॥

यस्माद् विदेहात् सम्भूतो वैदेहस्तु ततः स्मृतः।
एवं विदेहराजश्च जनकः पूर्वकोऽभवत्।
मिथिर्नाम महातेजास्तेनायं मैथिलोऽभवत्॥ **7.57.20** ॥

इति सर्वमशेषतो मया
कथितं सम्भवकारणं तु सौम्य।
नृपपुङ्गवशापजं द्विजस्य
द्विजशापाच्च यदद्भुतं नृपस्य॥ **7.57.21** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तपञ्चाशः सर्गः॥